International Journal of Sanskrit Research 2024; 10(3): 142-147

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 142-147
© 2024 IJSR
www.anantaajournal.com
Received: 05-03-2024
Accepted: 07-04-2024

**Mayuri Raja Rajeswari Panda**
Research Scholar, Department of Sanskrit, Kalahandi University, Odisha, India

**Corresponding Author:**
**Mayuri Raja Rajeswari Panda**
Research Scholar, Department of Sanskrit, Kalahandi University, Odisha, India

# दर्शनशास्त्राणाम् आधुनिकसमाजे प्रभावः ।

**Mayuri Raja Rajeswari Panda**

## प्रस्तावना

विचित्रतापरिपूर्णे संसारसागरेऽहर्निशं भासमानानां बद्धजीवानां कृते मुक्तिकूलप्राप्तये दर्शनतरणिरेव सर्वश्रेष्ठा सरणी मन्यमानाः "संसारसम्बन्धविलयो मोक्षः"- इति सर्वे दार्शनिकाः स्वीकुर्वन्ति । ऐहिकामुत्रिकनिःश्रेयसप्राप्तये नानाविधा उपायास्तै स्थिरीकृताः । तत्र ज्ञान-कर्म-भक्तिषु त्रिषु मुख्यमार्गेषु भक्तिरेव परमा चरमा इति निर्दिष्टा । आत्यन्तिकदुःखप्रहाणपुर्वकं निरतिशयसुखसाक्षात्काररूपो मोक्षश्चरमो विषयः । तत्र मोक्षस्य स्वरूपं :-" मुक्तिर्नैजसुखानुभूतिः" इति। सत्त्वरजस्तमोगुणाः जीवानामाश्रित्य सुखदुःखानि भोजयन्ति। सत्त्वगुणस्य प्रकर्षवशाज्जीवः मोक्षावस्थायां चरमं सुखमनुभवति। विशुद्धसत्त्वगुणाधिक्यात् तथा दुःखलेशोऽप्यस्ति। एवञ्च विशुद्धरजोगुणाधिक्याज्जीवः संसारजाले निवद्धो भवति।

## उद्देश्य /महत्वम्

वयम् भिन्न भिन्न प्रकृतिवन्तः जनाः एकैकस्य प्रकृतिइच्छारुचिचिन्तनम् एकैकविधं भवति खलु । यदि कर्मजन्यमोहः पुनश्च अहंकारा इति एतद् द्वयं वयं जेतुं शक्नुमः तर्हि वयम् विश्वम् एव जेतुं शक्नुमः। दर्शनशास्त्रस्य आरम्भतः अन्तपर्यन्तं मनसाः नियन्त्रणविषये एव उक्तमस्ति। यथाः-

इच्छाः कथं जेतव्याः?
इन्द्रियाणि कथं वशिकर्तव्यानि?
मनः कथं निग्रहणियम्?
अहंकारः कथं जेतव्याः?
मनः कथं शान्तकरणियम्?

यत् न चिन्तनियम् आसीत् यस्मिन् विषये दु:खं न करणीयमासीत् तस्मिन् विषये भवान् दु:खं कृतवान् इति चेत् यत् गृहितव्यं तत् ग्रहणं न भवति। सहिष्णुताहीनजनाः विषादग्रस्ताः (depression) चेत् आत्महत्यां कुर्वन्ति किदृशं लज्यास्पदम् इदम् अतः इयं परिस्थितिः अस्माभिः सर्वथा दूरिकर्त्तव्य नैजसुखानुभूतिर्मुक्तितः एतद् सर्वमपि ज्ञान्तुं शक्नुमः।

**शोधप्रबंधस्य प्रविधिः-** अन्वेषणात्मकवर्णनात्मकः शोधः। तंत्र प्रायशः दशाध्यायाः सन्ति। प्रत्यध्याये समुचिता विन्दवाः सन्ति तथा यदुद्दिष्टं तत् सर्वं संलग्नः भविष्यन्ति।

## विषय

'दृशिर् प्रेक्षणे' इत्यस्माद्धातोरनुबन्धलोपे "ल्युट् च" (३|३|११५) "करणाधिकरणयोश्च" (३|३|११७) इत्याभ्यां सूत्राभ्यां करणे भावे च ल्युटि "युवोरनाकौ"(७|१|१) इत्यनादेशे "कृत्तद्धितसमासाश्च" (१|२|४६) इति प्रातिपादिकत्वात् सु प्रत्यये "अतोऽम्"(७|१|२४) इत्यनेन सोरमि 'दर्शनम्' इति पदं निष्पद्यते । तत्र दर्शनीयं वस्तु संसारः आत्मतत्त्वञ्च। अपरपक्षे दृश्यमानस्य संसारस्य किं तावत्तात्त्विकस्वरूपमिति दर्शनशब्दार्थो बोध्यः । यद्वा संसारे कोऽहं कुतः आयातः देहपाते कुत्र गच्छामि किमधुना मम कार्य्यमित्यादीनि सर्वाणि आत्मसाक्षात्काररूपं दर्शनमिति विवक्ष्यन्ते मनिषिणः। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्योनिदिध्यासितव्यः" इत्यत्र दृश्यते ज्ञायते परमतत्त्वमत्र मुख्यतयाऽभिप्रेयते दर्शनशब्देन ।
तद्दर्शनं द्विविधम् । आस्तिकनास्तिकभेदेन । अस्ति परलोके ईश्वरे वेदे च मतिर्यस्य स आस्तिकः । तद्विपरितो नास्तिकः। न्याय-वैशेषिक-सांख्य-योग-वेदान्त-मीमांसाः षडास्तिकाः स्वीकृताः । बौद्ध-जैन-चार्वाकाः षड् नास्तिकाश्च विख्याताः । आस्तिकदर्शनेषु सर्वादौ न्यायदर्शनं दिङ्मात्रं प्रदर्श्यते।

वेदान्त-मीमांसाः षडास्तिकाः स्वीकृताः । बौद्ध-जैन-चार्वाकाः.... षड् नास्तिकाश्च विख्याताः। आस्तिकदर्शनेषु सर्वादौ न्यायदर्शनं दिङ्मात्रं प्रदर्श्यते।

### 1. न्यायदर्शनम्

महर्षि गौतमप्रणीतं न्यायदर्शनं पञ्चाध्याय विशिष्टम्। प्रत्यध्यायः आह्निकद्वयविशिष्टः। चतुश्चत्वांरिशदधिकचतुःशतानि )४४४(सूत्राणि अत्र विलसितानि । नीयते प्राप्यते अयनं मोक्ष अनेनेति न्यायः आन्विक्षिकी विद्याशब्देनोच्यते । न्यायनये- "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तअवयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः [1] इति षोडशपदार्थानां तत्त्वज्ञानेन अपवर्गो निश्चितः । स च "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" [2] इति गौतमोक्तेः। "प्रत्यक्षानुमानोपमानशब्दाः" [3] चत्वारि प्रमाणानि । आत्मेन्द्रियदेहादयो द्वादशविधाः प्रमेयाः [4] उक्ताः । आत्मा द्विविधः। जीवात्मपरमात्मभेदात् । जीवात्मा शरीरेन्द्रियमनोबुद्धिभ्योऽन्यः । तस्मिन् सुखदुःखेच्छाप्रयत्नद्वेषधर्माधर्मसंस्काराः गुणाः तिष्ठन्ति । मुक्तावस्थायां एतेभ्यो गुणेभ्यो रहितो भवति जीवः । अत्र सुखदुःखानामनुभवो नास्तीति गौतमीया मन्यन्ते ।

### 2. वैशेषिकदर्शनम्

परमाणूनां पार्थक्यकारणं विशेषः । तदंङ्गीकाराद्वैशेषिकम्। कणादप्रोक्तं वैशेषिक दर्शनम् दशाध्याय विशिष्टम्। प्रत्यध्याये द्वौ पादौ स्तः । सूत्राणि चात्र सप्तसप्तत्यधिकशतानि)१७७ ( परिमितानि । तत्र "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् " [5] इति षट् भावपदार्थाः निश्चिताः । अत्र नवद्रव्याणि,

---

1 न्या०सू०-१

2 तत्र-२

3 तत्रैव-३

4 तत्रैव-९

5 वै०सू०-१

चतुर्विंशतिगुणाः, पञ्चकर्माणि, सामान्यं द्विविधम्, समवाय एकः, अभावश्चतुर्विधः स्थिरीकृतः । ज्ञानाश्रय आत्मा नित्यः सर्वव्यापि । ईश्वरमोक्षविषये न्यायनयेन सह एतेषां साम्यमस्ति ।

### 3. सांख्यदर्शनम्

कपिलप्रणीतं सांख्यदर्शनम् षडाध्याय विशिष्टम् । षड् विंशत्यधिक पञ्चशतानि )५२६ (सूत्राणि । "त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" [6] इति आदिमसूत्रेण दुखत्रयाद्विमुक्तिः पुरुषार्थ उक्तः । दुःखहानं तु पञ्चविंशतितत्त्वज्ञानेन[7] जायते । यदुक्तं-

"पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः" ॥[8]

इति । अत्र प्रकृतिस्त्रिगुणात्मिका । पुरुषो निर्गुणः । अनयोः संयोगेन बन्धः । वियोगेन च मोक्षः इति कापिला मन्यन्ते ।

### 4. योगदर्शनम्

षड्विंशतितत्त्वात्मकमष्टांगैर्विलसितं [9] पातञ्जलशास्त्रं समाधि-साधन-विभूति-कैवल्यभेदैश्चतुष्पादयुक्तम् । अत्र पञ्चनवत्यधिक शतानि १९५ सूत्राणि संकलितानि । "अथ योगानुशासन" [10] मिति प्रारम्भिकं सूत्रम् । चतुर्व्युहात्मको योगः समाधिः । युज् समाधौ अनेन आत्मसाक्षात्कार ईश्वर [11] साक्षात्काररूपो वा योग उक्तः । ॐकार ईश्वरवाचकः [12] । भगवता पतञ्जलिना योगः चित्तवृतीनां निरोध उक्तः[13] । कास्ता वृतयः ? यासां निरोधः कर्तव्यः ?" प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतय" [14] श्चेति पञ्च चित्तवृत्तयः क्लिष्टाऽक्लिष्टाभेदेन[15] द्विधा । क्लेशहेतुकाः क्लिष्टाः । ख्यातिविषया अक्लिष्टाः । कस्मात् चित्तवृत्तीनां निरोधः कर्त्तव्यः ? उच्यते –"तदा द्रष्टुः स्वरूपेऽवस्थानम्" [16] इति । द्रष्टुः नाम पुरुषस्य आत्यन्तिक स्वरूपावस्थितेर्हेतुः कैवल्यमेति योगिनो वदन्ति ।

### 5. मीमांसादर्शनम्

जैमिनीप्रोक्तं कर्ममीमांसा [17] दर्शनं द्वादशाध्याय विशिष्टम् । तत्र प्रथम द्वितीय चतुर्थ पञ्चम सप्तम नवम एकादश द्वादशाध्यायाः चतुष्पादात्मिकाः। तृतीय षष्ठ दशमाध्यायाः अष्टपादात्मिकाः । सूत्राणि चात्र षट् पञ्चाशदधिक एकत्रिंशत् शतानि ३१५६ सूत्राणि सन्ति । संकर्षणकाण्डः चतुरध्याय विशिष्टः । प्रत्याध्यायः चतुष्पादात्मकः । सूत्राणि ऊनाशीत्यधिक षट् शतानि ६७९ सन्ति । सर्वाणि मिलित्वा पञ्चत्रिंशदधिक अष्टत्रिंश शतानि ३८३५ संख्यकानि भवन्ति । वेदानां विधिरस्ति अनुष्ठानम् धर्मशब्दवाच्यम् निष्कामकर्माणि मुक्तिं प्रति हेतुरिति उच्यते । तस्मात् "अथातो धर्म जिज्ञासा" [18] इति मीमांसाया आदिमं सूत्रम् । इदं मीमांसाशास्त्रं वैदिककर्मविषयैः परिपूर्णम् । अस्मिन् कर्मकाण्डीय समस्तवेदवाक्यानां सम्यग्विचारः विहितः । श्रुत्यादयः षट् प्रमाणानि वेदोक्तार्थनिर्णये संप्रवृत्तानि । तथा च सूत्रं - "श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां पारदोर्बल्यमर्थविप्रकर्षात्" [19] इति। अत्र वेदो नित्य

[6] सांख्य० सू०-१

[7] मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ सां०का०-३

[8] गौ०भा०

[9] यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः यो०सू०-२/२९

[10] यो०सू०-१/१

[11] क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष एव ईश्वरः यो०सू०-१/२४

[12] यो०सू०१-/२७

[13] यो०सू०-१/२

[14] यो०सू०-१/६

[15] यो०सू०-१/५

[16] यो०सू०१/३

[17] कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः-ईशोपनिषत्२

[18] मी०सू-१/१

[19] मी०सू०-३/३/१४

अपौरुषेयः । तेनैव सृष्ट्यादि कर्मजातं प्रचलति । वेदस्य स्वतःप्रमाणत्वमंगीकृतम् मीमांसकैः ।

## 6. वेदान्तदर्शनम्

महर्षि वादरायण-प्रणीतम् उत्तर-मीमांसाख्यं वेदान्तदर्शनं चतुरध्याय विशिष्टम् । प्रत्यध्यायश्चतुष्पादात्मकः । अत्र द्विपञ्चाशदधिक पञ्चशतानि)५५२ (सूत्राणि एकनवत्यधिक शतानि )१९१ (अधिकरणानि च सन्ति । सर्वशास्त्राणां शिरोमणिभूतं वेदान्तो नाम उपनिषत्प्रमाणभूतं [20] विशिष्टं शास्त्रम् । अथातो ब्रह्मजिज्ञासेति [21] प्रथमं सूत्रम् । अत्र ब्रह्म सद्वस्तु[22] । तदतिरिक्तं चराचरात्मकं दृश्यमानं जगत् मायामयत्वादसत्यमज्ञानविजृम्भितम् ब्रह्मणो विवर्तमात्रम्। अहं पदार्थो जीवः । जीवब्रह्मणो भेदो नास्ति । अज्ञानात् भेदो दृश्यते । तथा हि भगवत्पादेन-

"श्लोकार्द्धेन कथयामि यदुक्तं ग्रन्थकोटिभिः ।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ॥"

इत्यत्र जीवात्मपरमात्मनोरभेदः प्रदर्श्यते । सृष्टिविषये " -तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः। ओषधीभ्यो अन्नम् ।" [23] इति प्रक्रिया सिद्धा । तत्र ऐतरेयोपनिषदि "प्रज्ञानं ब्रह्म"," अहं ब्रह्मस्मि" [24], "तत्त्वमसि" [25] माण्डूक्योपनिषदि च "अयमात्मा ब्रह्म" इति चत्वारि महावाक्यानि वेदान्तमतसम्मतानि सन्ति । आत्मसाक्षात्कारादेव मोक्ष इति शांकरप्रमुखा ब्रह्मद्वैतवादिनः कथयन्ति ।

## 7. शैवदर्शनम्

तत्र शिव एव विश्वस्यात्मा सश्चैतन्यस्वरूपः [26] परमेश्वरः । शैवदर्शनं द्वैताद्वैतभेदेन द्विविधम् । अभिनवगुप्तपादा अद्वैतशैवमतस्य प्रवर्त्तकाः । इतरे द्वैतवादमाश्रित्य प्रचलन्ति। दशविधानि शैवदर्शनानि । तेषु कालमुख-कापालिक-कारुणिकादीनि तद्विषयसाहित्यस्य विलुप्तत्वात् नाममात्रज्ञातानि भवन्ति । दशविधेषु द्वैतवादधुरन्धराः पाशुपतशैवाः द्विप्रकारकाः । द्वैताद्वैतपरकाः नकुलीशपाशुपताः । श्रीकंठसमर्थकाः विशिष्टाद्वैतवादिनः । श्रीपतिपण्डितेन श्रीकरभाष्ये व्याख्यातं शुद्धद्वैताद्वैत-। शुद्धाद्वैताद्वैत-सेश्वराद्वैत-शिवाद्वैत-विशेषाद्वैतापराभिधं वीरशैवमतं प्रसिद्धम् । अत्र महदारभ्य पृथिव्यन्ताः त्रयोविंशति पदार्थाः कार्यान्तर्गताः । सर्वत्र पतिपाशपशवः त्रीणि मुख्यप्रमेयानि [27] । पतिः शिवः । आणवतिरोधायकशक्तिविन्दुमायाकर्मरूपेण पञ्चपाशाः। पशुस्तृतीयो देहेन्द्रियादिव्यतिरिक्तो नित्यश्चिदात्मकोऽनेको विभुरनादिमलावृतोऽस्वतन्त्र कर्ता जीवो वा । पाशान्ते शिवसायुज्यता । यदुक्तं-

"चैतन्यदृक् क्रियारूपं तदस्यात्मनि सर्वदा ।
सर्वतश्च यतो मुक्तौ श्रूयते सर्वतोमुखम् ॥[28]" इति।

यद्यपि आत्मनः सर्वज्ञत्वं स्वतःसिद्धं किञ्चिद् ज्ञत्वं च मलसकाशाज्जायते । आत्मनो तिस्रोऽवस्था स्वीकृताः। केवलावस्था-सकलावस्था-शुद्धावस्था चेति। शैवदर्शने विविधा विषयाः समुपवर्णिताः । धर्मपालने बाह्यपूजादिषु शिवलिंगपूजनं सर्वश्रेष्ठमिति उच्यते । ततो लभते रुद्रसायुज्यम् [29] । "ईशान सर्वविद्याना"मिति मन्त्रोपलक्षिते ब्रह्मणि समाधिना सायुज्ययोगः । भविष्ये प्रमाणम्-

लिंगे देवो महादेवः सर्वदेवनमस्कृतः ।

20 वेदान्तसारः

21 ब्र०००सू०-१/१

22 सत्यं ज्ञानमनन्तं ब्रह्म तै०उ०-२/१

23 तै०उ०-२/१

24 बृ०उ० १/४/१०

25 छा०उ०-६/८/७

26 शि०सू०-१

27 शैवपरिभाषा

28 स०द०सं० पृ-०२०

29 पा०सू०-१३७

अनुग्रहाय लोकानां तस्मान्नित्यं प्रपूजयेत् ॥
इति।

### 8. चार्वाकदर्शनम्

चारु सुन्दरं लोकसम्मतमापाततो मनोरमं वचनं यस्यासौ चार्वाकः । बृहस्पतिना आगतत्वात् बार्हस्पत्यमिति वा केचद्वदन्ति । पृथिव्यपस्तेजोवायुरितिचत्वारि भूतानि प्रमेयपरकाणि तत्त्वानि । प्रत्यक्षमेकमात्रं प्रमाणम् । भूतसमुदायैः किण्वादिभ्यो मदशक्तिवत् शरीरेन्द्रियविषयसंज्ञात्मकं चैतन्यमुत्पद्यते । भूतनाशात् चैतन्यनाशः । देहपातान्मोक्षः । परलोको नास्ति । राजा एव परमेश्वरः । अंगनालिंगनादिसुखमेव परमपुरुषार्थः । वेदोक्तकर्मादीनि निर्मूलानि । तथाहि सर्वदर्शनसंग्रहे-

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥ अपि च तत्र-

पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति ।
स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते ॥
तस्मात्-

यावज्जीवेत्सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥
एतेषां नये जगद्वैचित्र्यं तु स्वभावादेव प्रवर्तते ।
इति

### 9. बौद्धदर्शनम्

भगवान् बुद्ध अस्य मतस्य आदिप्रवर्त्तकः। माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकभेदेन चतुर्विधा बौद्धाः प्रत्यक्षवदनुमानमपि प्रमाणरूपेण स्वीकुर्वन्ति । इमे चत्वारः सर्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति चतुर्विधया भावनया स्वमतमुपस्थापयन्ति। अत्र चत्वारि आर्यसत्यानि दुःख-दुःखसमुदय-दुःखनिरोध-दुःखनिरोधमार्गरूपाणि सन्ति । रूप-वेदना-संज्ञा-संस्कार-विज्ञानात्मकपञ्चस्कन्धसमुपेतदेह एव दुःखस्य स्वरूपम् । कार्यकारणरूपेण अविद्या-संस्कार-विज्ञान-नाम-रूप-षडायतन-स्पर्श-वेदना-तृष्णोपादान-भव-जरा-मरणानि दुःखसमुदयो द्वादशैव भवन्ति । इदमेव भवचक्रमित्यभिधीयते [30] । इहजन्म प्रति पूर्वजन्मतः कारणं भवति । अयमेव "प्रतीत्यसमुत्पाद "इत्यभिधीयते [31] । निर्वाणमेव मोक्षः दुःखनिरोधरूपः । तथाहि-

आरोग्या परमा लाभा सन्तुट्टी परमं धनम् ।
विस्सा स परमा ञाति निव्वाणं परमं सुखम् ॥[32]
इति।

तृष्णाक्षये मोक्षोत्पत्तिः । निर्वाणमार्गस्य सम्यक् दृष्टिः, सम्यक् संकल्पः, सम्यग् वाक्, सम्यक् कर्मान्तम्, सम्यक् आजीवः, सम्यग् व्यायामः, सम्यक् स्मृतिः,सम्यक्समाधिरिति अष्टांगानि प्रशस्तानि [33] । निर्वाणं विहाय अन्यत्सर्वं क्षणभंगुरमिति बौद्धाः मन्यन्ते ।

### 10. जैनदर्शनम्

रागादिजेतृत्वाज्जिनः । स एव जैनदर्शने परमेश्वरः । यदुक्तं माधवाचार्य्यैः-

सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः ।
यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥[34] इति

अर्हत् पदवाच्यः परमेश्वरः महावीर एव जैनदर्शनस्यान्तिमः प्रवर्त्तको मन्यते। जैननये जीवाजीवौ द्वे तत्त्वे । जीवो बौधश्चैतन्यरूपः आत्मा । मुक्त-संसारिभेदेन द्विविधो जीवः । भवान्तरप्राप्तिरहितो मुक्तः । जन्ममृत्युसंसरणशीलाः संसारिणः। ते पुनः समनस्का अमनस्का भेदेन द्विविधाः । अजीव अबोधो जडो वा

---

30 सा०द० पृ-२९

31 तत्र पृ-२९

32 ध०प०-१५/२०४

33 दर्शनशास्त्रस्येतिहासः पृ-३

34 स०द०सं०

धर्माधर्माकाशकालपुद्गलभेदेन पञ्चधा विभक्तः। जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षाख्यानि सप्ततत्त्वानि[35]। धर्मो गतिर्मुक्तेः साधनम् । अधर्मः स्थितिर्बन्धनकारणम् । पुद्गलो द्रव्यविशेषः । कर्मपरमाणूनामात्मनि चलनमास्रवः । कर्मफलभोगार्थं बन्धनम् । भवप्रवाहसंवरकत्वेन संवरः । अर्जितकर्मणस्तपःप्रभावैर्निर्जरणं नाम आत्यन्तिकविमुक्तिकरणं निर्जरातत्त्वमुच्यते । पूर्वसंचितकर्मावरणक्षयो मोक्षः । सम्यग्ज्ञानचारित्र्याणि मोक्षमार्ग[36] इति उपदिशन्ति विवसना जैनाः ।

## उपसंहार

सत्त्वरजस्तमोगुणाः जीवानामाश्रित्य सुखदुःखानि भोजयन्ति। सत्त्वगुणस्य प्रकर्षवशाज्जीवः मोक्षावस्थायां चरमं सुखमनुभवति। विशुद्धसत्त्वगुणाधिक्यात् तथा दुःखलेशोऽप्यस्ति।एवञ्च विशुद्धरजोगुणाधिक्याज्जीवः संसारजाले निवद्धो भवति। नैजसुखानुभूतिर्मुक्तिः एतद् सर्वमपि ज्ञान्तुं शक्नुमः।

## संदर्भ


1. अष्टाधायी- महर्षि पाणिनिथ (AUTHOR:- DR.NARESH JHA | PUBLISHED:- CHAUKHAMBA SURBHARATI PRAKASHAN | EDITION:- 2019 )
2. न्यायसूत्रम्- गौतममुनिकृतम् (AUTHOR:- DR. GANGANATHA JHA | PUBLISHED:- ORIENTAL BOOK AGENCY | EDITION:-1939)
3. वैशेषिकसूत्रम्- कणादमुनिकृतम् (AUTHOR:- Prof. K.T. PANDURANGI | PUBLISHED:- VIDYADHISHA SAMSKRUTA SHODHA KENDRA | EDITION:-2011)
4. सांख्यसूत्रम्- कपिलमुनिकृतम् ( AUTHOR:- DR. RAMASHANKAR BHATTACHARYA |PUBLISHED:- RATTANA PUBLICATION | EDITION:-2009)
5. सांख्यकारिका- ईश्वरकृष्णकृता(AUTHOR:- Prof. K.T. PANDURANGI | PUBLISHED :- DVAITA VEDANTA STUDIES AND RESEARCH FOUNDATION, BANGALORE. | EDITION:- 2010)
6. गौडपादभाष्यम्- गौडपादाचार्यः (AUTHOR:- Prof. K.T. PANDURANGI | PUBLISHED:- VIDYADHISHA SAMSKRUTA SHODHA KENDRA | EDITION:- 2009)
7. योगसूत्रम्- पतञ्जलिप्रणीतम्( AUTHOR:- DR.DAMODARA SHASTRI | PUBLISHED:- CHAUKHAMBA, VARANASI |EDITION:-2005)
8. मीमांसासूत्रम्- जैमिनीप्रणीतम्( AUTHOR:- PANDIT GANGANATHA JHA | PUBLISHED:- ORIENTAL BOOK AGENCY | EDITION:- 1998)
9. वेदान्तसारः- सदानन्दयोगीन्द्रः ( AUTHOR:- RAMASHARANATRIPATHI SHASTRI | PUBLISHED:- CHAUKHAMBA, VARANASI | EDITION:-2011)
10. ब्रह्मसूत्रम्- व्यासदेवकृतम् (AUTHOR:- PANDIT DAMODAR LAL GOSWAMI AND RATNA GOPALA BHATTA | PUBLISHED:- CHAUKHAMBA, VARANASI | EDITION:-1867)
11. शिवसूत्रम्- वसुगुप्तप्रणीतम् (AUTHOR:- KRISHNA NANDA SAGARA | PUBLISHED:- RATTAN PUBLICATION | EDITION:- 2008)
12. शैवपरिभाषा- ज्ञानशिवाचार्यः (AUTHOR :- SRI H.R. RANGASWAMY IYENGAR | PUBLISHED:- ORIENTAL RESEARCH INSTITUTE PUBLICATION | EDITION:- 1950)
13. सर्वदर्शनसंग्रहः- सायणमाधवाचार्यः (AUTHOR:- DR. UMASHANKAR SHARMA | PUBLISHED:- CHAUKHAMBA, VARANASI | EDITION:- 2001)
14. सामान्यदर्शनम्- प्रो॰ नीलकंठपतिः (H.P. COMPUTERS CLARK ROAD, PURI | EDITION:- 2015)
15. दर्शनेषु तत्त्वचतुष्टयम्- प्रो॰ नीलकंठपतिः (SRI JAGANNATH OFFSET PRINTER BADAMBADI, CUTTACK -12 | EDITION :- 1992)
16. धर्मपदः- राहुल साकृत्यायनः
17. दर्शनशास्त्रस्येतिहासः- डाँ शशिबाला गौडः
18. श्रीमद्भागवतम्- गीताप्रेस
19. सर्वदर्शनकौमुदी - दामोदरमहापात्र १९७५
20. दशश्लोकी- शंकराचार्यः
21. वैष्णव संप्रदायों का साहित्य और सिद्धान्त- बलदेव उपाध्यायः
22. भागवतसन्दर्भः- जीवगोस्वामी


[35] त॰सूत्रम्-४

[36] तत्र-१